बुधकवचम्

{॥ बुधकवचम् ॥}

श्रीगणेशाय नमः ।

अस्य श्रीबुधकवचस्तोत्रमन्त्रस्य कश्यप ऋषिः,

अनुष्टुप् छन्दः, बुधो देवता, बुधप्रीत्यर्थं जपे विनियोगः ।

बुधस्तु पुस्तकधरः कुङ्कुमस्य समद्युतिः ।

पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥ १॥

कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा ।

नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥ २॥

घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम ।

कण्ठं पातु विधोः पुत्रो भुजौ पूस्तकभूषणः ॥ ३॥

वक्षः पातु वराङ्गश्च हृदयं रोहिणीसुतः ।

नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥ ४॥

जानुनी रौहिणेयश्च पातु जङ्घेऽखिलप्रदः ।

पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ॥ ५॥

एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम् ।

सर्वरोगप्रशमनं सर्वदुःखनिवारणम् ॥ ६॥

आयुरारोग्यशुभदं पुत्रपौत्रप्रवर्धनम् ।
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥ ७॥

॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं सम्पूर्णम् ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Budha Kavacham Lyrics in Devanagari PDF
% File name : budhakavach.itx
% Category : kavacha
% Location : doc_z_misc_navagraha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : brahmavaivartapurANa
% Latest update : February 23, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website